শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে

# ॥ অষ্টাদশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ অষ্টাদশঃ সর্গঃ ॥

## স্বকীযস্ত্রীভিঃ পরিৱৃতস্য রাৱণস্যাশোকৱনিকাযামাগমনং হনুমতা তস্য দর্শনং চ

তথা ৱিপ্রেক্ষ্যমাণস্য ৱনং পুষ্পিতপাদপম্।
ৱিচিন্ৱতশ্চ ৱৈদেহীং কিঞ্চিচ্ছেষা নিশাভৱৎ॥ **5.18.1** ॥

ষডঙ্গৱেদৱিদুষাং ক্রতুপ্রৱরযাজিনাম্।
শুশ্রাৱ ব্রহ্মঘোষান্ স ৱিরাত্রে ব্রহ্মরক্ষসাম্॥ **5.18.2** ॥

অথ মঙ্গলৱাদিত্রৈঃ শব্দৈঃ শ্রোত্রমনোহরৈঃ।
প্রাবোধ্যত মহাবাহুর্দশগ্রীৱো মহাবলঃ॥ **5.18.3** ॥

ৱিবুধ্য তু মহাভাগো রাক্ষসেন্দ্রঃ প্রতাপৱান্।
স্রস্তমাল্যাম্বরধরো ৱৈদেহীমন্ৱচিন্তযৎ॥ **5.18.4** ॥

ভৃশং নিযুক্তস্তস্যাং চ মদনেন মদোৎকটঃ।
ন তু তং রাক্ষসঃ কামং শশাকাত্মনি গূহিতুম্॥ **5.18.5** ॥

স সর্ৱাভরণৈর্যুক্তো বিভ্রচ্ছ্রিযমনুত্তমাম্।
তাং নগৈর্ৱিৱিধৈর্জুষ্টাং সর্ৱপুষ্পফলোপগৈঃ॥ **5.18.6** ॥

ৱৃতাং পুষ্করিণীভিশ্চ নানাপুষ্পোপশোভিতাম্।
সদা মত্তৈশ্চ ৱিহগৈর্ৱিচিত্রাং পরমাদ্ভুতৈঃ॥ **5.18.7** ॥

ঈহামৃগৈশ্চ ৱিৱিধৈর্ৱৃতাং দৃষ্টিমনোহরৈঃ।
ৱীথীঃ সম্প্রেক্ষমাণশ্চ মণিকাঞ্চনতোরণাম্॥ **5.18.8** ॥

নানামৃগগণাকীর্ণাং ফলৈঃ প্রপতিতৈর্ৱৃতাম্।
অশোকৱনিকামেৱ প্রাৱিশৎ সন্ততদ্রুমাম্॥ **5.18.9** ॥

অঙ্গনাঃ শতমাত্রং তু তং ৱ্রজন্তমনুৱ্রজন্।
মহেন্দ্রমিৱ পৌলস্ত্যং দেৱগন্ধর্ৱযোষিতঃ॥ **5.18.10** ॥

দীপিকাঃ কাঞ্চনীঃ কাশ্চিজ্জগৃহুস্তত্র যোষিতঃ।
ৱালৱ্যজনহস্তাশ্চ তালৱৃন্তানি চাপরাঃ॥ **5.18.11** ॥

কাঞ্চনৈশ্চৈৱ ভৃঙ্গারৈর্জহ্রুঃ সলিলমগ্রতঃ।
মণ্ডলাগ্রা বৃসীশ্চৈৱ গৃহ্যান্যাঃ পৃষ্ঠতো যযুঃ॥ **5.18.12** ॥

কাচিদ্ রত্নমযীং পাত্রীং পূর্ণাং পানস্য ভ্রাজতীম্।
দক্ষিণা দক্ষিণেনৈৱ তদা জগ্রাহ পাণিনা॥ **5.18.13** ॥

রাজহংসপ্রতীকাশং ছত্রং পূর্ণশশিপ্রভম্।
সৌৱর্ণদণ্ডমপরা গৃহীৎৱা পৃষ্ঠতো যযৌ॥ **5.18.14** ॥

নিদ্রামদপরীতাক্ষ্যো রাৱণস্যোত্তমস্ত্রিযঃ।
অনুজগ্মুঃ পতিং ৱীরং ঘনং ৱিদ্যুল্লতা ইৱ॥ **5.18.15** ॥

ৱ্যাৱিদ্ধহারকেযূরাঃ সমামৃদিতৱর্ণকাঃ।
সমাগলিতকেশান্তাঃ সস্ৱেদৱদনাস্তথা॥ **5.18.16** ॥

ঘূর্ণন্ত্যো মদশেষেণ নিদ্রযা চ শুভাননাঃ।
স্ৱেদক্লিষ্টাঙ্গকুসুমাঃ সমাল্যাকুলমূর্ধজাঃ॥ **5.18.17** ॥

প্রযান্তং নৈর‍ৃতপতিং নার্যো মদিরলোচনাঃ।
বহুমানাচ্চ কামাচ্চ প্রিযভার্যাস্তমন্ৱযুঃ॥ **5.18.18** ॥

স চ কামপরাধীনঃ পতিস্তাসাং মহাবলঃ।
সীতাসক্তমনা মন্দো মন্দাঞ্চিতগতির্বভৌ॥ **5.18.19** ॥

ততঃ কাঞ্চীনিনাদং চ নূপুরাণাং চ নিঃস্বনম্।
শুশ্রাৱ পরমস্ত্রীণাং কপির্মারুতনন্দনঃ ॥ **5.18.20** ॥

তং চাপ্রতিমকর্মাণমচিন্ত্যবলপৌরুষম্।
দ্বারদেশমনুপ্রাপ্তং দদর্শ হনুমান্ কপিঃ ॥ **5.18.21** ॥

দীপিকাভিরনেকাভিঃ সমন্তাদৱভাসিতম্।
গন্ধতৈলাৱসিক্তাভির্ধ্রিযমাণাভিরগ্রতঃ ॥ **5.18.22** ॥

কামদর্পমদৈর্যুক্তং জিহ্মতাম্রাযতেক্ষণম্।
সমক্ষমিৱ কন্দর্পমপৱিদ্ধশরাসনম্ ॥ **5.18.23** ॥

মথিতামৃতফেনাভমরজোৱস্ত্রমুত্তমম্।
সপুষ্পমৱকর্ষন্তং ৱিমুক্তং সক্তমঙ্গদে ॥ **5.18.24** ॥

তং পত্রৱিটপে লীনঃ পত্রপুষ্পশতাৱৃতঃ।
সমীপমুপসঙ্ক্রান্তং ৱিজ্ঞাতুমুপচক্রমে ॥ **5.18.25** ॥

অৱেক্ষমাণস্তু তদা দদর্শ কপিকুঞ্জরঃ।
রূপযৌৱনসম্পন্না রাৱণস্য ৱরস্ত্রিযঃ ॥ **5.18.26** ॥

তাভিঃ পরিৱৃতো রাজা সুরূপাভির্মহাযশাঃ।
তন্মৃগদ্বিজসঙ্ঘুষ্টং প্রৱিষ্টঃ প্রমদাৱনম্ ॥ **5.18.27** ॥

ক্ষীবো ৱিচিত্রাভরণঃ শঙ্কুকর্ণো মহাবলঃ।
তেন ৱিশ্রৱসঃ পুত্রঃ স দৃষ্টো রাক্ষসাধিপঃ ॥ **5.18.28** ॥

ৱৃতঃ পরমনারীভিস্তারাভিরিৱ চন্দ্রমাঃ।
তং দদর্শ মহাতেজাস্তেজোৱন্তং মহাকপিঃ ॥ **5.18.29** ॥

রাৱণোঽযং মহাবাহুরিতি সঞ্চিন্ত্য ৱানরঃ।
সোঽযমেৱ পুরা শেতে পুরমধ্যে গৃহোত্তমে।
অৱপ্লুতো মহাতেজা হনূমান্ মারুতাত্মজঃ॥ **5.18.30**॥

স তথাপ্যুগ্রতেজাঃ স নির্ধূতস্তস্য তেজসা।
পত্রে গুহ্যান্তরে সক্তো মতিমান্ সংৱৃতোঽভৱৎ॥ **5.18.31**॥

স তামসিতকেশান্তাং সুশ্রোণীং সংহতস্তনীম্।
দিদৃক্ষুরসিতাপাঙ্গীমুপাৱর্তত রাৱণঃ॥ **5.18.32**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে সুন্দরকাণ্ডে অষ্টাদশঃ সর্গঃ॥